## षष्ठोऽध्यायः

# उपनिषद्दृष्ट्या–कर्मवैशिष्ट्यम्

# षष्ठोऽध्यायः

# उपनिषद्दृष्ट्या कर्मवैशिष्ट्यम्

**प्रथमो विरामः** -- वेदे कर्म वैशिष्टयम्

**द्वितीयो विरामः** -- पौराणिक वांङ्मये कर्म वैशिष्टयम्

**तृतीयो विरामः** -- स्मृत्यनिषु कर्म वैशिष्टयम्

**चतुर्थो विरामः** -- कर्म

# प्रथमो विरामः

# वेदेकर्मवैशिष्टयम्

भारतीय वांङ्गमये वेदानां प्राधान्यं वैशिष्ट्यं प्रामाण्यं च स्वीक्रियते। चतुर्षुवेदेषुलक्षपरिमिताः मन्त्राः सन्ति तेषां वेदानां अनेकाः शाखा-प्रशाखा सन्ति। तत्र वेदेषु अनेकानां विषयाणाम् वर्णनं उपलभ्यते।

को हि नाम सविषयः यो वेदेषु न चर्चितः। किन्तु अत्र वेदे कर्मवैशिष्ट्यं किमस्ति, कथंमस्ति, कुत्र च वर्तते इति अध्येतवयम्।

ऋग्वेदे सृष्टिसूक्ते, पुरुषसूक्ते अनेके अंशाः एतादृशाः प्राप्यन्ते यत्र कर्मणः कर्मसदर्भाः मंत्राः दरीदृश्यते। वेदे प्राधान्येन कर्मसंदर्भाः मंत्राः कथमस्ति अत्र प्रस्तूयते।

**वेदेवर्णाश्रम कर्मविषयाः ---**

वेदानां पर्यालोचनेन ज्ञायते नराणां कर्मादि पञ्चश्रेणी विभागः निर्दिष्टाः यथा --

1. ब्राह्मणः
2. क्षत्रियः
3. वैश्यः
4. दासः
5. दस्यु च। तत्र चत्वारः आर्याः सन्ति।

ब्राह्मणोऽस्य मुखमासीद्, बाहू राजन्यः कृतः।

उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत।।[1]

ते भेदाः पाश्चाद् जातिपदेन उच्चारितः। जातिशब्दः जन्मवाचकः। तस्मिन्नेवकरले ते-ते भेदाः जन्मनाएव प्रवृत्ताः। तथैव आश्रमव्यवस्थाया विषयेऽपि तद्कर्मणां उपदेशः अपि वेदे प्राप्यते। यथा --

आचार्य उपनयमानो ब्रह्मचारिणं कृणुत गर्भमन्तः।

तंर रात्रीस्तिस्र उदरे विभर्ति तं जातं द्रष्टुमसिंयन्ति वेदाः।।

इयं समित्पृथिवी द्यौर्द्वितीयोतान्तरिक्षं समिधा पृणाति।

ब्रह्मचारी समिधा मेखलया श्रमेण लोकास्तथा पिपर्ति।।

पूर्वो जातो ब्रह्मणो ब्रह्मचारी धर्म वसानस्तपसोदतिष्ठत्।[1]

तस्माज्जातं ब्राह्मणं ब्रह्म ज्येष्ठं देवाश्च सर्वे अमृतेन साकम्।।

अस्मिन् खलु ब्रह्मचर्यकाले गुरुकुलाश्रमे निवसन्तो ब्रह्मचारिण आचार्य सकाशात् त्रिविधा विद्याः, विज्ञानानि, शिल्पकलाश्च शिक्षन्ते निःशुल्कम्। तदर्थ वेदेऽतिरमणीयं वाणीसूक्त प्रवर्त्तते सहृदयहृदयावर्जकम्।

ऋग्वेदस्य दशममण्डलस्य एकसप्ततितमं सूक्तं ---

---

1. ऋक्. 10/90/12
2. ऋग्वेद

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।

अत्रा सखाय: सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधिवाचि।[1]

यज्ञेन वाच: पदवीयमायन्तामन्वविन्दत्रृषि प्रविष्ट।

तामाभुत्या व्यदुध: पुरुषा तां सप्तरेभा अति संनवन्ते।।[2]

उत: त्व: पश्यन्नं ददर्श वाचमुत: त्व: शुण्वत्र शुणोत्येनाम्।

उतो त्वमसं तन्वं वि सस्रे जायेव पत्य उशती सुवासा:।।

उतं त्वं सख्ये स्थिरपीतमाहुनेनं हिन्वत्यपि वाजिनेषु।

अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम्।।

अक्षण्वन्त: कर्णवनत: सखायो मनोजवेष्वसमा बभूवु:।

आदध्नास उपकक्षास उ त्वे हृदा इव स्नात्वा उ त्वे ददृश्रे।।

इमे ये नार्वाङ्ग न परश्चरन्ति न ब्राह्मणसो न सुतेकरास:।

त एते वाचमभिपद्य पापया सिरीस्तन्त्रं तन्वते अप्रजज्ञय:।।

**वेदेगृहस्था:---**

वेदेषु मानवसमाजस्य मूलाधाररूपेण गृहसथाश्रम: निर्दिष्ट: एतदाश्रयोत्कर्षेणैव मानवानां शारीरिकी आध्यात्मिकी मानसी च उन्नति: भवति। आध्यात्मिकविषये विवाह विधि प्रतिपादक मन्त्र: अपि वर्तन्ते। यथा --

---

1. ऋग्वेद - 10/71 सूक्त
2. ऋग्वेद

शुद्धाः पूता योषितो यज्ञिया इमा ब्रह्मणां हस्तेषु पृथक् सादयामि।

यत्काम इदभिषिञ्चामि वोऽहमिन्द्रो मरुत्वान्तस ददातु मे।।[1]

अयं भावः -शुद्धाः पूता यज्ञियासः वैवाहिकयज्ञयोगयाः योषितः तरुण्यः ब्रह्मणां ज्ञानिना हस्तेषु प्रदातव्या इति भावः। तदेतेन तरुणीनां विवाहो योगयः ताश्च ज्ञानिभ्यः पुरुषेभ्यः एव प्रदेया इति निर्दिश्यते।

**वेदे स्त्री-पुरुषयोः समानकर्मः---**

वेदेषु उभयो समानाधिकारः निर्दिष्टः। पुरुषंबिना नारी नार्थकरी, पुरुषोऽपि तथैव नारीबिना अपार्यः अतैव यानि कार्याणि
पुरुषाः साध्यन्ति तानि अनेकानि कार्याणि अपि साधितुम् समर्थाः। स्त्रीणां कर्तव्यम् परिणीतायाः पतिकुलं कीदृशं गौरवास्पदं इति ध्वनयति --

साम्राज्ञी श्वसुरे भव साम्राज्ञी श्वश्रुवां भव।

ननान्दरि साम्राज्ञी भव, साम्राज्ञी अधिदेवेषु।।[2]

अहो कीदृशं सम्मानास्पदं पदं स्त्रीभ्यः समर्पितं वेदे। पाणिग्रहणानन्तरं वधूः श्वसुरेकले निवसेदति निर्दिशन्नाह --

भगमस्या वचं आदिष्याधि वृक्षादिव स्रजम्।

महाबुघ्न इव पर्वतो ज्योक्पितृष्वास्ताम्।।[3]

---

1. अथर्व. - 6/122/5
2. अथर्व.
3. अथर्व.- 1214/1

पुनश्च वधूपक्षवर्तिनः आहुः --

एषा ते राजन् कन्या वधूर्निधयतां यम।

स मातुर्बध्यतां गृहेऽथो भ्रातुरथो पितुः।।[1]

भूयोऽपि वधूरक्षणार्थम् पत्युर्विधेयमुपदिशति --

अस्तिस्य ते ब्रह्मणा कश्यपस्य गयस्य च।

अन्तः कोशमिव जामयोऽपि नाह्यामि ते भगम्।।[2]

गृहस्थाश्रमप्रविष्टा स्त्री-विदुषा भवन्ती मूर्धन्या वाककलाकुशला स्यात्। पतिश्चापि तत्सम्मयत्या एव समस्तगृहकार्यभारं वहतु इत्यपि निर्दिशति श्रुतिः --

अहं केतुरहे मूर्ध्वा हमुग्रा विवाचनी।

मामेदनकतु पतिः सेहानाया उपाचरेत्।। इति[3]

**वेदे राजधर्मः कर्म च :---**

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्।

तां मा देवा व्यदधुः पुरुत्रा भूररिस्थात्रां भूर्यावेशयनतीम्।

मया सो अन्नमिति यो विपश्यत यः प्राणिति य इ शृणोत्यक्तम्।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धविं ते वदामि।[4]

---

**1.** अथर्व. - 1214/2

**2.** अथर्व. 1/14/4

**3.** श्रुतिः **4.** ऋग्वेद - 10/125/3-4

त्रीणि राजाना विदथे परिपश्वानि सदांसि।[1]

एवमथर्वणि अपि राजसभायाः मन्त्रिमण्डलस्य, राज्यकार्यस्य सौकर्येण सञ्चालनार्थमतिदेशो विहितः --

विराड् वा इदमग्र आसीत्। सा सभायां न्यक्रामत्। सोदक्रामत्-सा समितौ न्यक्रामत्। सोदक्रामत् मन्त्रणे न्यक्रामत्।।[2]

**वेदे वैश्यकर्मः--**

राष्ट्रस्यार्थिकस्थिति समुन्नेतुं वणिगधर्म उपदिश्यते। निर्धनं राष्ट्रं परैरभिभूतं सर्वदा दुःखभाजनं सदवनतिगर्त निपतति। अतो व्यापारोद्योगद्वारा धनधान्यसमृद्धिं कर्त्तुमेव वैश्यैस्सततं प्रयतनशीलैः भवितव्यम्।

इन्द्रमहं वणिजं चोदयामि स न एतु पुर एता नोऽस्तु।

नुदन्नरातिं परिपनिथनं मृगं --

स ईशानो धनदा अस्तु मुह्यम्।।[3]

ये पन्थानो बहवो देवयाना अन्तरा द्यावापृथिवी सञ्चरन्ति।

ते मा जुषन्तां प्यास घृतेन यथा क्रीत्वा धनमाहरन्ति।।[4]

---

1. ऋग्वेद मन्त्र 3, सूक्त-38
2. अथर्व. - 8/10/1-12
3. अथर्व. 8/10/3-12
4. अथर्व. 3.15.2

अत्र वणिग्धर्मनिरूपणपुरस्सरं वाणिज्यस्य मौलिको राद्धन्तः पल्लवितः। धनेन धनवर्द्धनाय वणिग्भिः रयिपोतवायुयानादिभिः स्थलजलागगमार्गेण सञ्चरद्भिः राष्ट्रस्य कोषवृद्धिः सम्पादनीया। किञ्च --

येन धनेन प्रपणं चरामि धनेन देवा धनमिच्छमानाः।

तन्मे धनं भूया भवतु मा --

-कनीयो अग्ने सातघ्नो दवा हविषा निषेध।।[1]

तच्च धनं भूयो भवतु मा कनीय अल्पीय इति मन्त्रनिष्कर्षः। सर्वेऽपि जना राष्ट्रेधनवन्तः श्रीमन्तश्च स्यु इति भावः।

एतादृशं वर्णनं वेदेषु जाति-जन्म दृष्ट्या च प्राप्यते। तथापि सामान्य जनानां कानि कर्माणि गुणकर्मानुगेण्येन निर्धारितानि। यथा -तत्र यजरक्षणमायोधनं यजनाध्ययनदानानि चाङ्ग्रयकाषुः। कृषिकर्म-गोरक्षण-वाणिज्यानि यजनाध्ययनदानानि च परिजगृहुर्वैश्या। शूद्राश्च पुनरवशिष्टां पूर्वोक्तत्रिवर्णपरिचर्यामाददिरे। एतस्या एव

वैदिकमर्यादायाः परिरक्षणाय स्थिरीकरणाय च स्मृतिपुराणतिहासादीनि शास्त्राणि प्रावर्त्तिषत इति।

---

1. अथर्व. 3/15/5

**वेदे-राष्ट्रभावना :---**

वेदे राष्ट्रभावनापि विद्यते। तत्र राजानां किम् कर्तव्यं इत्यपि निर्दिष्टं यथा---

यदजः प्रथमं सम्बभूव तत्स्वराज्यमियाय।

तस्मान्नान्यतपरमस्ति भूतम्।[1]

ध्रुवं त राजा वरुणो ध्रुवं देवा वृहस्पतिः।

ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्।।[2]

आ त्वाहार्षमन्तरेधि ध्रुवस्तिष्ठाविचाचलिः।

विशस्त्वा सर्वा वाञ्छञ्तु मा त्वद्राष्ट्रमधिभ्रशत्।।[3]

इहैविधि माप चयेष्ठाः पर्वत इवाविचाचलिः।

इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय।।[4]

भद्रमिच्छन्त ऋषय स्वर्विदस्तपो दीक्षामुप निषेदुरग्रे।

ततो राष्ट्रं बलमोजश्चजातं तदसमै देवा उपसंनमन्तु।।[5]

वेदे विश्वमेवाखिलं राष्ट्रत्वेनााभिमतम्। न जातु भौगोलिकभेदविभिन्नं देशविधया खण्डभूतम् यत्तद्वा देशविषोनुगृहीतं

---

1. अथर्व. - 10/7/3
2. ऋग्वेद - 10/174/5
3. ऋग्वेद - 10/173/1
4. ऋग्वेद - 10/173/2
5. अथर्व. - 19/41/1

राष्ट्रम्।तादृशराष्ट्रस्य राजा तादृशो भवेत् यं सर्वाः प्रजा वाञ्छेयुः। तादृशस्य एकच्छत्रभवतो राज्ञो राष्ट्रं न जातु भ्रष्टाचारपद्धतिमवतरत् इति भावः।

**वेदे मांसभक्षणम् :---**

वेदे मांसभक्षण कर्मनिषेधं विहितं वर्तते। यथा --

गोमांसवदश्वादिपशुमांसभक्षण-

मनुष्यमांसभक्षणं च निषिद्धम्।

यः पौरुषेयेण क्रविषा समङ्क्-

यो अश्व्येन पशुना यातुधानः।

यो अघ्न्याया भरति क्षरमग्ने-

तेषां शीर्षाणि हरसा वि वृश्च।।[1]

एवमेव पक्षिणामपि वर्णनमुपलभ्यते। तत्र पतत्त्रिगणे नीरक्षीरविवेकित्वेन प्रसिद्धः हंसः असकृन्निदर्शितः। सोऽयं जले पलवमानो वियति च पतमानः आम्नातः। अस्य लोकप्रसिद्धा जलदुग्धविभेदेनचातुरी नीर-सोमयोः विभेदनकरी श्रूयते। नभसि पंक्तिबद्धतया पतमानस्य क्रौच्चपक्षिणोऽपि वर्णनं रमणीयतां विभर्त्ति। दामपत्यपाशबद्धश्चक्रवाका अपि वर्णिताः।

---

1. ऋग्वेद - 10/87/16

**वेदे पुनर्जन्मविषये :---**

पुर्जन्माधिकृत्यातिरमीयं तत्त्वं ऋचो वर्णयन्ति ---

असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम्।

ज्योक् पश्येम सूर्यमुच्चरन्तमनुमते मृडया नः स्वस्ति।।[1]

पुनर्मनः पुनरायुर्म आगन् पुनः प्राणः पुनरात्मा म आगन्।

पुनश्चः पुनः श्रोत्रं म आगन्।

वैश्वानरो अदब्धस्तूपनपा अग्निर्नः पातु दुरितादवद्यात्।।[2]

आ यो धर्माणि प्रथमः ससाद ततो वंपूषि कृणुते पुरूणि।

धास्युर्योनि प्रथम आविशेष यो वाचमनुदितां चिकेत।।[3]

**वेदे द्यूतादिकर्म निषेधः --**

ऋग्वेदीयदशममण्डलस्य चतुस्त्रिशत्तमे सूक्ते 'अक्षाख्य- द्यूतक्रीडाया निन्दा निषेधश्च विहितः।

अक्षैर्मा दीव्यः कृषिमित् कृषस्व रमस्व बहु मन्यमानः।

तत्र गावः कितवः तत्र जाया तन्मे विचष्टे सवितायमर्यः।।[4]

जयाया माता कितवं निन्दति। भार्या च निरुणद्धि। याचमानः कितवः द्यूतकृद् धनं न लभते। किञ्च :---

---

**1.**ऋग्वेद - 8/1/23/6

**2.** यजुर्वेद - 4/15

**3.** अथर्व. - कां. 5/ अनु. व. म.-2

**4.** ऋग्वेद

अन्ये जायां परिमृश्यन्त्यस्य यस्यागृद्वदेन वाज्यक्षः।

पिता माता भ्रातर एनामार्हुन जानीमो नयता बद्धमेतत्।।

जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्वचित्।

ऋणवा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नकतमेति।।

द्रव्यापहरामपि विषये वेदे निषेधं वर्तते। कथं निषिध्यते इति आहः

द्वेष्टि श्वश्रूरप जाया रुणद्धि न नाथितो विन्दते मर्डितारम्।

अश्वस्येव जरतो वस्त्यस्यनाहं विन्दामि कितवस्य भोगम्।।[1]

वेदे ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासश्चेति चत्वारा महत्व- पूर्णा आश्रमाः वर्णिताः सन्ति। ब्राह्मण-क्षत्रिय-वैश्य-शूद्रश्चति चत्वारो वर्णाः। आश्रमेषु प्रथमो ब्रह्मचर्याश्रमः, तमनुतिष्ठन हि ब्रह्मचारी भवति। स च द्विविधः स्नातको नैष्ठिकश्चेति। साङ्गापाङ्ग वेदमधीत्य यः स्नायात् स स्नातकः। द्वितीयो गृहस्थाश्रमः। नित्यनैमित्तककर्मानुष्ठाननिरतो विहितदारपरिग्रहो गृहस्थः। तस्य ब्रह्म -देव-पतृ-अतिथि-भूतयाख्यानि च कर्मणि। तत्र यत्स्वाध्यायमधीते स ब्रह्मयज्ञः, यदगनौ जुहेति स देवयज्ञः। तृतीयो वानप्रस्थाश्रमः। य खलुः सकलगृहस्थसंसारव्यवहारं परित्यज्य सकलत्रोऽत्रो वा वने प्रतिष्ठति स वानप्रस्थः। यः पुनरपक्वाशी सोऽपचमानः। यश्च सम्यग्वीतरागो वितृष्णश्च सन् ज्ञाननोकया जगदम्बोधितरणाय यतत

---

1. ऋग्वेद

स यतिः संन्यासीत्युच्यते। सोऽयं तुरीयाश्रमः संन्यासाश्रमः। संन्यासिना तावत् त्यक्त्वा कर्मपटली, चिकित्सनीयो दुर्बोधव्याधिः, स्वीकर्तव्या भिक्षावृत्तिः, विषहणीर्य शीतौष्णयादिद्वन्द्वम, समाधतव्यं परब्रह्मणि चेतः, प्रविलापनीयो वासनासमवायः, हातव्यः कर्मसंश्लेषः, न कर्तव्यं प्राणिनां हिंसनम्, न विस्मर्त्तव्याः परोपकृतयः, न विचलितव्यं न्याय्यात्पथः। इत्यादयोः यतिधर्माः सर्वात्मनाऽनुष्ठानेयाः।

वेदेषु यन्निर्दिष्टं कर्मविषये तदवे उपनिषदां वाणीसु अपि प्राप्यते। अनेने मन्त्राः उपनिषत्सु प्राप्यन्ते यत्र कर्मवैशिष्ट्यं सिद्धयति एतदेव कर्म करणीयं। अनेनकारणेन भगवता कृष्णेन गीतायां कथितम् --

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परा गतिम्।।
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवसिथतौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहर्हसि।।[1]

---

1. गीता-16/23-24

## द्वितीयोविरामः

# पौराणिकवाङ्गमये कर्मवैशिष्ट्यम्

वैदिकवाङ्गमयस्य अध्ययनार्थम् तत्वज्ञानाथं च पुराणानं आविर्भावः जातः। महर्षि व्यासेन अल्पश्रुताणां तत्ववुभुत्सुनाम् कृते पुराणानि निर्मितानि इति संसूच्यते। किम् नाम पुराणाम् तत्र --

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।

वंशानुचरितञ्चैव पुराणं पच्च लक्षणम्।।

इति पुराण लक्षणं अस्ति। पुराणदिऽपि अष्टादश महापुराणानि, अष्टादश उपपुराणानि, अष्टादश च औपपुराणानि सन्ति। महापुराणानां --

म-द्वयं- भ-द्वयञ्चैव, ब्र-त्रयं व-चतुष्टयं।

अ-ना-प-लिङ्ग-कूस्मानि पुराणानि प्रचक्षते।।[1]

एवं प्रकारेण महापुराणानां नामानि सन्ति। पुराणेषु प्रायेण सर्वेविषयाः समाहिताः सन्ति। तथापि अत्र पुराणानाम् कर्मविषये किम् वैशिष्ट्यं अस्ति इति विविच्यते।

पुराणानां आविर्भावः वदरहस्यस्य उद्घाटनाय एव। तर्हि प्राचीन प्रवादः यथार्थः एव।

वेदार्थोपबृहणानिपुराणानि इति। यत् तत्वं वेदेषु प्राप्यते तत् तत्वम् पुराणेषु उपलभ्यते। तत्र कर्माणि त्रीणि गदितानि। यथा

---

1. देवीभागवत

1. नित्यकर्म

2. नैमित्तिककर्म

3. काम्यकर्म च।

पुराणानां मतं वर्तते। कर्मएव प्रधानं। यतोहि -कर्मनुगोच्छतिजीव एकः। अनेन कारणेन मत्स्यपुराणे यच्चरितं वर्तते वंशंनिरूपणं वर्तते। तत्र मानुषी सृष्टिः दैवी सृष्टिः च वर्तते। अनेन चरितेन वर्णनेन च कर्मवैशिष्ट्यं उद्घोषितं मार्कण्डेयपुराणे हरिश्चन्द्रोपाख्यानम् यम-पुरुष संवादः महालसः उपाख्यानं वर्णाश्रमधर्मोद्देश्च तत्र कर्मकीर्तनम् उट्टङ्कितम्।

यत्राधिकृत्य शकुनानि धर्मान् धर्मविचारणा।

व्याख्याता वै मुनिप्रश्ने मुनिभिः धर्मचारिभिः।।

मार्कण्डेय कथितम् --- मार्कण्डेयमिहोच्यते।[1]

पुराणानां न केवलं धार्मिकदृष्ट्या अपितु ऐतिहासिक-भौगोलिक, सामाजिक-शास्त्रीय दृष्ट्याऽपि मूलतो नीतिग्रन्थाः एव। तत् स्त्री-शूद्र-द्विजबधूनाम् कृते सन्ति। भारतीय जीवन पद्धते सर्वाणि कर्माणि सर्वविषयाणि च तत्रैव प्राप्यते।

विष्णुपुराणे वैष्णवानां प्रधानकर्मशास्त्रम् वर्णितम् अस्ति।

अग्निपुराणे नारदपुराणवत गारुडसदृशंवा संग्रहः वर्तते। तत्र अनेकेषु प्रसंगेषु कर्मविषयकं विवेचनं प्राप्यते।

---

1. मार्कण्डेयपुराण

स्कन्दपुराणं विशालकायं वर्तते। मुख्यत: इदं सप्तेषु खण्डेषु विभक्तं अपि च भारतवर्ष स्थितनां समग्र तीर्थानां वर्णनं तदवर्णने मनुष्यस्य पुण्यकर्मणा प्रायश्चित्तं विवेचितम्। कर्मकाण्डस्य जीवस्य मुक्ति: सम्भविष्यति। अग्रे यानि पुराणानि सन्ति तेष्वपि कर्मविषयकं रहस्यं कर्मवैशिष्ट्यं तदाचरणे च मानवानां जीवानां सुखोपलब्धि साधनमपि तत्रैव विहितं वर्तते।

अन्यानि पुराणानि यानि सन्ति तेषु अपि कर्मविषयकं औचित्यं कर्मण: प्राधान्यं तदविधानं च सांगोपाङ्गं वर्णनं उपलभ्यते।

उपपुराणेषु अपि एतदेव कथानकं प्राप्यते यत्र जीवानां मनुष्याणां कल्याणाय कर्मएव प्राधान्यमस्ति इति।

मानव सभ्यतातिहास: अपि अत्रैव उपलभ्यते। पुराणेषु तात्कालिक भूगोलं स्पष्टतया उपस्थापितं अस्ति।

अतएव पुराणानां आविर्भाव: जीवकल्याणाय एव जात:।

# तृतीयो विरामः
## स्मृत्यनिषु कर्म वैशिष्टयम्

वर्णाश्रमेत्तराणां नो ब्रूहि धर्मानशेषत: इत्यत्र प्रतिपाद्यततय प्रतिज्ञातषड्विधधर्ममध्ये पच्चप्रकारं धर्मामभिधा -याधुनाऽवशिष्टं नैमित्तकं धर्मजातं प्रायश्चित्तपदाभिलप्यं प्रारिप्सु: प्रथमतस्त्प्राचनार्थ मधिकारिविशेषप्रदर्शनार्थ चार्थवाद -रूपं कर्मविपाकं तावदाह: --

''महापातकजान्घोरान्नरकान्प्राप्य दारुणान्।

कर्मक्षयात्प्रजायन्ते महापातकिनस्त्विह।।[1]

ब्रह्महत्यादिञ्चकस्य महापातकसंज्ञा ब्रह्महरमद्यप इत्यत्र वक्ष्यते तद्योगिनो महापातजनितांस्ताभिस्र्रादिनरकान्जनित -दुष्कृतानुरूपान् घोराननतितीव्रवेदनापादकत्वेनति भयंकरान्दारु- णान्दुखैकभोगनिलयान् प्राप्य कर्मसाक्षात् कर्मजन्यनरकदु:ख -पभोगक्षयान्तरं कर्मशेषात्पुनरिह संसारे दु:खबहुलश्वरसृगालादि -तिर्यग्योनिषु प्रकर्षेण भूयोभूयो जायन्ते। महापातकिग्रहणा- मितरेषामप्युपपातक्यादीनामु- पलक्षणम्। तेषां च तिर्यगादियोनिप्राप्तेर्वक्ष्यमाणत्वात्।

महापातकिनां संसारप्राप्तिमुक्त्वा तद्विशेषकथनायाह--

'' मृग्श्वसूकरोष्ट्राणा ब्रह्मह्मं योनिमृच्दति।

खरपुल्कसवेणानां सुरोपा नात्र संशय:।।[2]

---

1. कर्मविपाक -206
2. कर्मविपाक -207

कृमिकीटपतङ्त्व स्वर्णहारी समान्पुयात्।
तृणगुल्मलतात्वं च क्रमशो गुरुतल्वगः।।[1]

मृगा हरिणादयः श्वसूकरोष्ट्राः प्रसिद्धाः तेषां योनिं ब्रह्मह्म स्वकर्मशेषेण प्राप्नोति।

खरो रासभः पुल्कसः प्रतिलोभनिषादेन शूद्रां जातः वैदेहके-नाम्बदृष्ट्यां जातो वेणस्तेषां योनिं सुरापः प्राप्नोति।

कृमयः सजातीयसंभोगनिरपेक्षां मांसविष्ठागोमयादिजन्याः, तत् किञ्चित्स्थूलतराः पक्षास्थिराहिताः: पिपीलिकादयः कीटाः, पंतगाः, शलभाः तेषां योनिं ब्राह्मण स्वर्णहारी प्राप्नुयात्। तृणं काशादि, गुल्मलते प्रागृक्ते तज्जतीयतां क्रमेण गुरुतल्पगः प्राप्नोति। एतच्चाकामकृतविषयम्। कामकरन्ते त्वन्सास्वापि दुःखबहुलयोनिषु संसरन्ति।

'' श्वसूकरखरोष्ट्राणां गोवाजिमृगपक्षिणाम्।
चण्डाल पुल्कसानां च ब्रह्महा योनि मृच्दति।।[2]
कृमिकीटपतङ्गानां विड्भुजां चैव पक्षिणाम्।
हिस्राणां चैव सत्वानां सुरापो ब्राह्मणो व्रजेत।।[3]

---

1. कर्मविपाक - 208
2. मनु. 12/55
3. मनु - 12/56

लूताऽहिसराठानां च तिरश्चा चाम्बुचारिणाम्।

हिस्राणां च पिशाचानां स्तेनो विप्रः सहस्रशः।।[1]

तृणगुल्मलतानां च क्रव्यादां दंष्ट्रिणामपि।

क्रूरकर्मकृतां चैव शतशो गुरुतल्पगः।।[2]

लूतोर्णनाभः। सरठः कृकलासः।।

एवं च तिर्यक्त्वादुत्तीर्णानां मानुष्य रोगादि लक्षणानि भवन्तीत्याह--

ब्रह्महा क्षयरोगी स्त्यात्सुरापः श्यावदन्तकः।

हेमहारी तु कुनखी दुश्चर्मा गुरुतल्पगः।।[3]

यो येन संवसत्येषां स तल्लिङ्गोऽभिजायते।

किंच। एवं रौरवाादिनकरकेषु श्वसूकरखादियोनिषु च दारुणं दुःखमनुभूयानन्तरं दुरितशेषेण जननसमय एव क्षयरोगादिलक्षणयुक्ताः। प्रचरेषु मानवशरीरेषु संसरन्ति। ब्रह्महा क्षयरोगी राजलक्ष्मी भवेत। निषिद्धसुरापः स्वभावतः कृष्णदशनः। बअह्मणहेम्नो हर्ता कृत्सितनखत्वम्। गुरुदारगामी दुश्चर्मत्वं कुष्ठिताम्।

---

1. मनु - 12/57
2. मनु - 12/58
3. सरठः कृकलासः - 209

‘‘अन्नहर्तामायावी स्यान्मूको वागपहारक:।[1]

धान्धमिश्रोऽतिरिक्ताङ्ग पिशुन: पूतिनासिक:।

तैल्हृतैल्पायी स्यात्पूतिवक्त्रस्तु सूचक:।।[2]

किंच। अन्नस्यापहर्ता आमयावी अजीर्णान्न:।

वागपहारकोऽननुज्ञाताहयायी पुस्तकापहारी च मूको वागिन्द्रिय विकल्पो भवेत्। धान्यमिश्रोऽतिरिक्तांगोषडङ्गुल्यादि पिशुनो विद्यमानपरदोषप्रव्यापनशील:।।

पूतिनासिक: दुर्गन्धनासिक लैलस्य हर्ता तैलपायी कीटाविशेषो भवति। सूचकोऽसद्दोषसंकीर्तनो दुर्गन्धिबदनो जायते।

एतच्च तिर्यकत्वप्रात्युत्तरकालं मानुषशरीरप्राप्तौ द्रष्टव्यम् यद्वा तद्वा परद्रव्यमहृत्य बलान्नर:। अवश्यं याति तिर्यक्त्वं जगह्वा चैवाहुतं हवि:। इति मनुस्मरणात।

‘‘परस्य योषितं हृत्वा, ब्रह्मस्वमहृत्य च।

अरण्ये निर्जने देशे, भवति ब्रह्मराक्षस:।।[3]

---

1. सरठ: कृकलास – 210
2. सरठ: कृकलास – 211
3. मनु – 212

किंच। हीनाजार्ता हेमकारख्यायां पक्षिजातौ पररत्नाद्यपहारको जायते। निर्जले देशे ब्रह्मराक्षसो भूतविशेषो जायते।

हीनजातौ प्रजायेत पररत्नापहारकः।

पत्रशाकं शिखी हत्वा गन्धाच्छुन्दरी शुभान।।[1]

किंच। हीनजातौ हेमकाराख्यां पक्षिजातौ पररत्नाद्यपहारको जायते। तथाच मनुः

''मणिमुक्ताप्रवलानि हृत्वा लोभेन मानवः।

विविधानि च रत्नानि जायते हेमकतृषु।।[2] इति।।

पत्रात्मकं शाकं हृत्वा मयूरः। शुभान्गन्धानपहृत्यछुच्छुन्दरी राजदुहिताख्या मूषिका जायते।।[3]

''मूषिका ध्न्यहारी स्याद्यानमुष्ट्रः कविः फलम्।

जलं प्लवः पथः काको गृहकारी ह्युपस्करम्।।

मधु दंशः पलं गृधो, गां गोधाग्निं बकस्तथा।

श्वित्री वस्रं श्वा रसं तु चीरी लवणहारकः।।[4]

किंच। धान्यहारी आखुः। यानं हृत्वोष्ट्रः। फलं वानरः। जलं प्लवः शकट विलाख्यः पक्षी। प्यः क्षीरं। काको ध्वाक्षः।

---

**1.** मनु. - 213

**2.** मनु. - 12/61

**3.** कर्मविपाक - 213

**4.** कर्मविपाक - 214- 215

गृहोपस्करं मुसलादि हृत्वा गृहकारी चटकाख्य: कीटविशेष:। मधु हृत्वा दंशाख्य: कीट:। पलं मांसं तद्धृत्वा गृधाख्य: पक्षी। गां हृत्वा गोधय: प्राणिविशेष:। अग्निं हृत्वां सारमेय:। लवणहारी चीर्याख्य: उच्चै: स्वर: कीट:।।[1]

एवं पदर्शनार्थ किंचिदुक्त्वा प्रतिद्रव्यम पृष्टाकोटिन्यायेन वक्तुमशक्तेकोपाधेन कर्मविपाक दर्शयितुमाह--

प्रदर्शनार्थमेततु मयोक्तं स्तेयकर्मणि।

द्रव्यप्रकाश हि यथा तथैव प्राणिजातय:।।[2]

द्रव्यस्यापाहिमाणस्य यादृशा: प्रकाशस्तादृशा एव प्राणिजातय: स्तेयकर्मण्यपहर्तारो भवन्ति। यथा कास्हारी हंस इति। अथवा यत्लसाधनं द्रव्यमहरति तत्साधनविकलो यथा पङ्गुतामश्वहारक इति।

ब्रह्महा कुष्ठी। तैजसापहारी मण्डली। देवब्राह्मणकोशक: खलति:। गरदाग्निदावुन्मतौ। गुरुं प्रतिहन्तापस्मारी। गोधनश्चान्ध:। धर्मपत्नीं त्यक्तवान्यत्र प्रवृत्त: शब्दवेधी प्राणिविशेष:। कुण्डाशी भगभक्षो देवब्रह्मस्वहारी। पाण्डुरोगी न्यासपहारी च काण:। स्त्रीपण्योपजीवी षष्ठ:।

---

**1.** कर्मविपाक - 214-215

**2.** कर्मविपाक - 216

कौमारदारत्यागी दुर्भगः। मिष्टैकाशी घातुगुल्मी। अभयभक्षको गण्डमाली। ब्राह्मणीगामी निर्बीजी। क्रूीकर्मा वामनः। वस्त्रापहारी पतंगः। शय्यापहारी क्षपणाकः। शङ्खशुक्त्यपहारी कपाली। दीपाहारी कौशिकः। मित्रध्रुक क्षयी मातीपित्रोराक्रोशः खज्जक इति।।

**गौतमोऽपि क्वचिद्विशेषामाहः**

अनृतवागुल्बालः मुहुमुर्हः संलग्नवाक्। दारत्यागी जलोदरी। कूटसाक्षी श्लापदी उच्छिन्नजङ्घचरणः। विवाहविघ्नकर्ता छिन्नोष्ठः। अवगूरणः छिन्नहस्तः। विवाहविघ्न श्रुषागामी वातवृषः। चतुष्पथे विणमूत्रविसर्जने मूत्रकृच्छी।

कन्यादूषकः षष्ठः। ईर्ष्यालुर्मशकः। पित्रा विवदमानोऽ –पस्मारी। न्यासपहारी अनपत्यः। रत्नापहारी अत्यन्तदरिद्रः। विद्याविक्रयी पुरुषमृगः। वेदविक्रयी सीपी। बहुयाजको जलप्लवः। अयाज्ययाजको वराहः। अनिमन्त्रितभोजिवायसः।

मृष्टैकभोजी वानरः। यतस्ततोऽश्वनमार्जारः। कक्षवनदहनात् खद्योतः। दारकाचार्यो मुखविगन्धिः। पर्युषितभोजीकृमिः। अदत्तादायी बलीवर्दः। मत्सरी भ्रमरः। अग्न्युत्सादी मण्डलकुष्ठी। शूद्राचार्यः श्वपाकः। गोहर्ता सर्पः। चाण्डालीपुल्कसीगमने अजगरः। प्रवर्जितागमने मरुपिशाचः। शूद्रीगमने दीर्घकीटः। सवर्णाभिगामी दरिद्रः। जलहारी मत्स्यः क्षीरहारी बलाकः। वाधृषिकोऽङ्गहीनः। अविक्रेयविक्रयी गृधः। राजमहिषीगामी नपुंसकः। राजाक्रोशको गर्दभः। गोगामी मण्डूकः। अनध्यायाध्ययने श्रृगालः।

परद्रव्यापहारी परप्रेष्यः। मत्स्यवधे गर्भवसी। इत्येतेऽनुर्ध्व गमना इति। स्त्रियोऽप्येषु निमित्तेषु पूर्वोक्तास्वैव जातिषु स्त्रीत्वमनूभवन्ति।।

यथाहमनुः--

"स्रियोऽप्येतेन कल्पेन हृत्वा दोषमवाप्नुयः।

एतेषामेव जन्तूनां भार्यात्वमुपयन्ति ताः।।[1] इति।।

एतच्च क्षयितावादिलक्षणकथनं प्रायश्चित्तोन्मुखीभूतब्रह्महाद्युद्-वेगजननार्थं न पुनः क्षयितावादिलक्षणयुक्तानां द्वादशवार्षिका-दिव्रतप्राप्त्यर्थम् संसर्गनिवृत्तयर्थं वा। पापक्षयार्थ प्रायश्चितम्। न च प्रायश्चित्तेन प्रारब्धफलपापापूर्व विनाशे किंचन प्रयोजनमस्ति। नहि कार्मुकनिर्मुक्तो बाण लक्ष्यवेधे वेद्धुस्तव्यापारस्य वा सत्तान्तरं पुनरेपेक्षते। न च तदारब्धफलनाशोंऽपूर्वनाशोऽन्वेषणीयः।

नहि निमित्तकारणीभूतचक्रचीवरादिविनाशेन तदारुब्ध-कारिकादिविनाशः। न च नैसर्गिकं कौनखयदिकं प्रत्यानेतु शक्यते। किंच नरकतिर्यग्योन्यादिजन्यदुःखपरम्पराभूतस्य हि कौनख्यादिको विकारश्चरमं फलम्।

---

1. मनु.

तेन चोत्पन्नमात्रेण स्वकरणापूर्वनाशो जन्यते मन्थमनजनिताशुशुक्षणिने -वाणिक्षयः। तस्मान्न पापविनाशार्थं व्रतपस्चिर्या नापि संव्यवहारार्थम। प्राचीनक्षयात्पापनाशेन संव्यवहार्यतवस्यापि सिद्धेनार्थो व्रतचर्यया।

**यत्तु वसिष्ठेनोक्तम् :--**

कुनखी श्यावदनतश्च कृच्द्ं द्वादशरात्रं चरेत्। इति तत्क्षामवत्यादिवन्नैमित्तिक -मात्रं न पुनः पापक्षयार्थं संव्यवहार्यतवसिद्धयर्थं वेति मन्तव्यम्।।[1]

''यथाकर्म फलं प्राप्य तिर्यकत्वं कालपर्ययात्।
जयन्ते लक्षणभ्रष्टा दरिद्राः पुरुषाधमाः।।[2]

किंच। यथाकर्म स्वकृतदुष्कृतानतिक्रमेण तदनुरूपं नरकादि फलं तिर्यक्त्वं च प्राप्य कालक्रमेण क्षीणे कर्मणि दुष्टलक्षणा दरिद्राश्च पुरुशेषु निकृष्टा जायन्ते।।

''ततो निष्कल्पमषीभताः कुले महीत भोगिन'।
जयन्ते विद्ययोपेता धनधान्यसमन्विताः।।[3]

किंच। ततो दुर्लक्षणमनुष्यजन्मानन्तरं निष्कल्मषीभसमता

---

**1.** वसिष्ठ - 216

**2.** वसिष्ठ - 217

**3.** वसिष्ठ - 218

नरकाद्युपभोगद्वारण क्षीणपापा: प्राग्भवीयसुकृतशेषेण महाकुले भोगसंपन्ना: विद्या धनधान्यसंपन्न जायन्ते।

एवं प्रायश्चित्तेषु प्ररोचनार्थ कुमवपाकमभिधायाध्नातेष्वेवाध –कारिणं निरुपयितुमाह--

''विहितस्यान्नुष्ठान्नन्निदतस्य च सेवनात्।

अनिग्रहाच्चेन्द्रियाणां नर: पतनमृच्दति।।[1]

तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये।

एवमस्यान्तरात्मा च लोकश्चैव प्रसीदति।।[2]

विहितमिति यदावश्यकं सहयोपासनाग्निहोत्रादिकं नित्यभशुचिस्पशादौ नैमित्तिकत्वेन चोदितं स्ननादिं च तदुभयमुच्यते तस्यकरणात्।[3]

निन्दितस्य निषिद्धस्य सुरापानादे करणात्, इन्द्रियाणामनि ग्रहाच्च नर: पतनमृच्छति प्राप्नोति। प्रत्यवाची भवतीति यवात्।

ननु इन्द्रियार्थेषु सर्वेषु न प्राज्यते कामत: इतीन्द्रियप्रसक्तेरपि निषिद्धत्वानिन्दतग्रहणेनैव गताथ्रत्वात्किमर्थमनि –ग्रहाच्चेन्द्रियाणमिति पृथगुपादानम्।

---

**1.** वसिष्ठ – 219

**2.** वसिष्ठ – 220

**3.** याज्ञवल्क्य स्मृति–पृ.-- 371–372

अत्रोच्यते –इन्द्रियप्रसक्तिनिषेधस्य नैकान्ततः प्रतिषेधरूपता सातकव्रत –मध्येऽस्य पाठातत्र च व्रतानीमानि धारयेत' इति व्रतशब्दाधिकारान्नश्रवणाच्चैन्द्रियप्रसक्ति प्रतिषेधकः सेकल्पो विधीयते। स च भावरूप इति पृथगुपादानम्।।

ननु विहिताकरणात् प्रत्यवैतीति कुतोऽषसितम्। न तावदग्निहोत्रादिचोदना पुरुषप्रवर्तनात्मिकानुष्ठानस्य मात्रर्प्यवसायिनी हि सा तावन्मात्रेण प्रवृच्युपपत्तेर्न पुनरकरणस्य प्रत्यवायहेतुत्वामपि वकित। क्षीणशक्तित्वादनुपपत्तेः।

किंच यद्यनुपपत्तयुपशमेति प्रवृत्तिसिद्धयर्थमंमर्थान्तरं कल्प्यते तर्हि निषिद्धमानक्रियाजन्यप्रत्यवायपरिहार्थतयैव तद्वनर्जनस्य पुरुषार्थत्वा –सिद्धावपि फलान्तरं कल्प्येत। नचैत्कस्याचिदपि समतम्।

ननु यथा निषिद्धेष्वर्थवादाकातप्रत्यवायपरिहार्थतापुरुषर्थत्वं तथा विहितेष्वप्यर्थ –वागताकरणजन्यप्रत्यपरिहाथाता कस्मान्न स्यात्।

मैवम्। नहि सर्वत्राग्निहोत्रादिषु तादिृग्वधार्थवादाः सन्ति। न च 'विहितस्याननुष्ठान्नरः पतनमृच्छति' इतीयं स्मृतिरेव वाक्यशेषस्थानीयेति चतुरस्रम्।[1]

नहि वाक्यान्तरप्रीमते कार्ये वाक्यान्तरेणार्थवादः संभवति। भवतु वा कथंचिदेकवाक्यार्थ वादस्तथापि नाभावरूपं विहिताकरणे कार्यान्तरं जनयितुं क्षमते।

---

1. याज्ञवल्क्य स्मृति, पृ. 362

ननु 'ज्वरे चैवातिसारे च लङ्घन परमौषधम्। इत्यादुर्वेदवचनादभोजनाभावरूपं लङ्घन ज्वरशांति जनयतीति यथावगम्यते तथात्रपि भवतु।

मैवम। यतो नात्रत्रापि लङ्घनाज्वरशांति किं तर्हि ज्वरनाशप्रतिबन्धकभोजनाभावे सति जठरानलपरिपाकजनिताद्धातु -साम्यदिति मन्तव्यम्। तस्मात् विहितास्याननुष्ठानान्नर:पतन -मृच्छति' इति कथमस्या: स्मृतेर्गतिरिति वाच्यम्

उच्यते।अग्निहोत्रादिविषयाधिकारसिद्धिरूप प्रत्यवायभिप्रायेणेति न दोष:।[1]

''वान्ताश्युल्कामुख: प्रेतो विप्रो धर्मात्वस्वकाच्च्युत:।

अमेद्यकुणपाशी च क्षत्रिय: कटपूतन:।।

मैत्राक्षज्योतिक: प्रेतो वैश्यो भवति पूयभुक्।

चैलाशकस्तु भवति शूद्रो धर्मात्स्वकाच्च्युत:।।[2] इति।।

एतानि विहिताकरणप्रत्यवायपराणि मनुवचनानि कथं घटन्ते। उच्यते। यथा वान्तमश्नूत उल्कया वा दह्यमानमुखस्य दु:ख तथास्यपि विहितमकृर्वत: पुरुषस्य पुरुषार्थसिद्धेरित्यकरणनिन्दन- मनुष्ठानप्ररोचनार्थ:विरोध:।

---

1. मनुस्मृति 12/71/72
2. मनुस्मृति

यदा प्राग्भवीयनिषिद्धा चरणाक्षिप्त विहितानुष्ठानविरोधि –रागालस्यादि जन्यवान्ता –श्युल्कामुखप्रेतत्वादिरूपमिसि न क्वचिदभावस्य कारणतेति मन्तव्यम्।

ननु ! पुश्चलीवानरखरदृष्ट मिथ्याभिरास्तादौ विहिताकरणा-दिभित्तानामन्यत –मस्याप्य भावात्कथं प्रत्यवयिता, कथं च तदभावे प्रायश्चित विधानम्।।[1]

उच्यते। अस्मादेव पापक्षयार्थप्रायश्चितविधानाज्ज्न्मान्तराचरित निषिद्ध सेवादि जन्य पापापूर्व समाक्षिप्तमित्यथभिशापादिकंतन्निमित्तप्रायश्चिता –पनोद्यमनेनानुष्ठितमित कल्प्यते। पुरुषप्रयत्नैर –पेक्ष्येण कार्यरूपपापोत्पत्त्यनुप-पत्तेः। न च पुंश्चल्यादिगत –प्रयत्तवेन पुरुषान्तरे पापोत्पत्तिः, कर्तृसमवायित्वानियमाद्धर्मा- धर्मरूपोः, तस्माद्युक्तैव प्रायश्चित्ते निमित्तत्रयपरिगणना।।

''अकुर्वन्विहितं कर्म निन्दितं च समाचरन्।

प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः।।[2] इति

नरग्रहणं प्रतिलोमजातानामपि प्रायश्चित्ताधिकाराप्राप्यर्थम। तेषामप्यहिंसादि साधारण धर्मव्यतिक्रमसंभवात्। यस्मादेवं निषिद्धाचरणादिना प्रत्यवैति तस्मात्तेन कृत निषिद्धसेवादिना पुरुषेण

---

**1.** याज्ञवल्क्य स्मृति, पृ. 372-372

**2.** मनु. - 11/44

प्रायश्चितम् कर्तव्यमिह लोके परत्र च विशुद्धयर्थम्। प्रायश्चित्तशब्दचायं पापक्षयार्थे नैमित्तिके कर्मविशेषेः रूढः। एवं प्रायश्चित्ते कृते अस्यान्तरात्मा शुद्धतया प्रसादिति। नौमित्तिकोऽयं प्रायश्चित्तधिकारः तत्र चार्थवादगातदुरितक्षयोऽपि जातेष्टिन्यायेन साध्यतया स्वीक्रियते।

नच दुरितपरिजिहासुनानुष्ठीयत इत्येतावता कामधिकारशङ्का कार्या।[1]

यस्मात--

''चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये।

निन्द्यैर्हि लक्षणैर्युक्ता जायन्तेऽनिष्कृतैः नासः।।

इत्यकरणे दोषश्रवणेनावश्यकत्ववगमात्।।[2]

प्रायश्चित्ताकरणे दोषमाहः---

''प्रायश्चित्त्मकुर्वाणाः पापेषु निरता नराः।

अपश्चात्तापिनः कष्टान्नरकायन्ति दारुणान्।।[3]

पापेषु शास्त्रार्थव्यतिक्रमजनितेषु प्रसक्ताः पुरुषाः अपश्चात्तापिनो मया दुष्कृतं कृतमित्येवमुद्वेगरहिताः प्रायश्चित्तमकुर्वाणाः दुःसहान्नरकाप्राप्नुवन्ति।।

---

1. याज्ञवल्क्य स्मृति, पृ. -373
2. याज्ञवल्क्य स्मृति, -219/220
3. याज्ञवल्क्य स्मृति - 221

# चतुर्थो विरामः

## कर्मः

कर्मणो महिमानमवलोक्य कश्चित् कश्चिन् मीमांसकाः ईश्वरस्य कर्मत्वेन स्वकिरोति । जैनानां बोध्दानां आचार्यैरपि अतएव ईश्वरं अस्वीकृत्य कर्म एव स्वीक्रियते । काचिद् जातिः कश्चिद् व्यक्ति र्वा स्व कृतस्य कर्मणः प्रतिक्रियाभिः रक्षितुम् आसक्तः भवति ।

''भूतभावोद्भवकरो विसर्गः कर्म संज्ञितः''।[1]

**भगवता श्रीकृष्णेन स्वमुखेनैवोक्तम् ः-**

भगवत् स्वभावः सच्चिदानन्दमयैक रसो वर्तते तस्याः एव अलैाकिक सत्ताया त्यागं कृत्वा यः भूतानां उत्पत्तिं कारयति तस्यैवाभिधानं कर्म इत्युच्यते ।

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः ।
एवं त्वयि नान्यथेतो ऽस्ति न कर्म लिप्यते नरे ॥[2]

यो हि जिजीविषेत् स कर्म कुर्वन् । अत्र कुर्वन्नेव जिजीविषदिति राग प्राप्तवत् अपि तु यदि तदा कुर्वन्नेव जिजीविषेदिति इच्छामनूद्य कर्म ननु

---

१- गीता ।८।३

२- ईशावास्योपनिषत् ॥२

कर्मविषये किं कश्चित्संशयोऽप्यस्ति येन पूर्वैः पुर्वतरं कृतमित्यातिनिर्बध्नासि अस्येवेमाह ।

किं कर्म किर्मेति कवयोऽप्यत्र मोहितः ।

तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ।।[१]

ननु कर्मविषये किं कश्चित्संशयोऽप्यस्ति येन पूर्वैः पुर्वतरं कृतमित्यातिनिर्बध्नासि अस्येवेमाह ।

किं कर्म किं वा परमार्थतोऽकर्मेति कवयो मेधाविनो ऽप्यत्रास्मिनीवषये मोहिता मोहं निर्णयासामर्थ्यं प्राप्ता अत्यन्तदुर्निरूपत्वात् अस्यादित्यर्थः । तत्तस्मात्तेतुभ्यमहं कर्म अकारप्रश्लेषणच्छाददकर्म च प्रवक्ष्यामि बाकेरण संदेहोच्छेदेन वतिामनि । यत्कर्माकर्मस्वरूपं ज्ञात्वा मोक्ष्यसे मुक्तो भविषयस्यशुभातसंसारात् ।

कर्मणो ह्यपि बोध्दव्यं बोध्दव्यं च विकर्मणः अकर्मणश्च बोध्दव्यं गहना कर्मणो गतिः ।।[२] ननु सर्वलोक प्रसिध्दत्वादमेवैतज्जानामि देहेन्द्रियादि व्यापार कर्म तूष्णीमासनमकर्मेति तत्र किं त्वया वक्तव्यमिति हि यसमात्

---

१ –गीता ।।४ ।।१६

२ –गीता ४ ।।१७

शास्त्रविहितस्यापि तत्त्वं बोध्द्व्यमस्ति । विकर्मणश्च प्रतिषिध्दस्य अकर्मणश्च तूष्णीभावस्य । अत्र वाक्यत्रेपि तत्त्वमस्तीत्याध्याहारः। यस्मात् ग्हना दुर्ज्ञाना । कर्मण इत्युपलक्षणं कर्माकर्मविकर्मणान् गतिस्तत्त्वमितयथरः।

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।

स बुध्दिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥[1]

कर्मणि देहेन्द्रियादि व्यापारे विहिते प्रतिषिध्दे चाहं करोमीति धर्म्यध्यासेनाऽऽत्मन्यारोपिते नैास्थेनाचलत्सु तटस्थवृक्षादिष्विव यः पशयेत्पश्यति । तथा देहेन्द्रियादिषु त्रिगुण मायापरिणामत्वेन सर्वदा सव्यापारेषु निर्व्यापारस्तूष्णीं सुखमास इत्यभिमानेन समारोपिते ऽकर्मणि व्यापारोपरमे दूरस्थचक्षुः सन्निकृष्टपुरषेषु गच्छत्सवप्यगमन इषव सर्वदा सव्यापारदेहेन्द्रियादि स्वरूपपर्यालेचनेन वस्तु गतया कर्म निवृत्याख्यप्रयत्नरूपं व्यापारं यः पश्येदुदाहृतपुरुषेषु गमनमिव । औदासीन्यावस्थायामप्युदासनीाऽह्मभासइत्यभिमान एव कर्म। एतादृशः परमार्थदर्शी स बुध्दिमानिन्द्रियादिना बुध्दिमत्वयोगयुक्तत्व सर्वकर्णकृत्वैस्त्रिभिर्धर्मैः स्तूयते।

---

१ – गीता ४ ॥१८

अत्र प्रथमपादेन कर्मविकर्मणस्तत्वं कर्मशब्दस्य विहित प्रतिषिधद परत्वात् द्वितीयपादेन चा कर्मणस्तत्वं दर्शितमिति द्रष्टव्यम् । तत्र यावन्मन्यसे कर्मणो बन्धहेतुत्वातूष्णीमेव मया सुखेन स्यातव्यमिति तन्मृषा । अस्ति कर्तृत्वाभिमाने विहितस्य प्रतिषिध्दस्य वा कर्मणे बन्धहेत्वाभावात् । तथा च व्याख्यातं न मां कर्माणि लिमपनतीत्यादिना । सति च कर्तृत्वाभिमाने तूष्णीमहमास इत्यैादासीन्याभिमानामकं यत्कर्म तदपि बन्धहेतुवस्तु तत्वापरिज्ञानम् । तस्मात्कर्मविकर्माकर्मणां तत्वमीदृशं ज्ञात्वा विकर्माकर्मणी परित्यज्य कर्तृत्वाभिमान फलाभिसंधिहानेन विहितं कर्मैव कुर्वित्यभिप्रायः।

कर्मणि ज्ञानकर्मणि दृश्ये जडे सद्रुपेण स्फुरणरूपेण चानुस्यूतं सर्वभ्रमाधिष्ठानमकर्मवेद्यं स्वप्रकाशचेतन्यं परमार्थदृष्टया यः पश्येत्। तथाऽकर्मणि च स्वप्रकाशे दृग्वस्तुनि कल्पितं कर्म दृश्यं मायामयं न परमार्थ सत् दृग्दृशययोः सम्बन्धानुपपत्तेः :-

यस्तु सर्वाणि भूतानि आत्मन्येवानु पश्यति ।
सर्वभूतेषु चाऽऽत्मानं ततो न विजिगुप्सते ॥[१]

एवं परस्परध्यासेऽपि शुध्दं वस्तु यः पश्यति मनुष्येषु मध्ये स एव

---

१ - इति श्रुतिः।

बुध्दिमान्नान्यः । अस्य परमार्थदर्शित्वाददन्यसय चापरमार्थदर्शित्वात् । स च बुध्दिसाधनयोगयुक्तोऽन्तकरण शुध्दयैकाग्रचित्तः। अतः स एवान्तकरणशुध्दिसाधनकृत्स्नकर्मकृदिति वास्तवधर्मैरेव स्तूयते।

यस्मादेवं तस्मात्त्वमपि परमार्थदर्शि भव तावतैव कृत्स्नकर्मकारित्वोपपत्तरित्यभिप्रायः। अतो यदुक्तं यज्ज्ञात्वा मन्यसेऽशु भादिति यच्चोक्तं कर्मादीनां तत्त्वं बोध्दव्यमस्तीति । स बुध्दिमानित्यादिस्तुतिश्च तत्सर्वः परमार्थदर्शने संगच्छते।

अन्यज्ञानादशुभात्संसारन्मोक्षानुपपत्तेः। अतत्वं चान्यन्न बोध्दव्यं न वा तज्ज्ञाने बुध्दिमत्वमिति युक्तेव परमार्थदर्शिना व्याख्या। यत्तु व्याख्यानं कर्मणि नित्ये परमेश्वरार्थेऽनुष्ठियमाने बन्धहेतुत्वाभवादकर्मदमिति यः पश्येत्। तथा कर्मणि च नित्याकर्माकरणे प्रत्यवायहेतुत्वेन कर्मेदमिति यः पश्येत्सबुध्दिमानित्यादि तदसंगतमेव। नित्यकर्मण्यकर्मेदमिति ज्ञानस्यशुभमोक्षहेतुत्जाभवात् मिथ्याज्ञानत्वेन बुध्दिमतवादिस्तुत्युपपत्तिर्भ्रान्ततत्वात्। नित्यकर्मानुष्ठानं हि स्वरूपतोऽन्तः करण शुध्दिद्वारोपयुज्यते न तत्राकर्मबुध्दि कुत्राप्युपयुज्यते शास्त्रेण नामादिषु ।[१]

---

१ – विवरण प्रमेय संग्रह

ब्रह्मदृष्टिवदविहितत्वात् नापीदमेव वाक्यं तद्विधायकमुपक्रमादिविरोध स्योक्तेः। एवं नित्यकर्माकरणमपि स्वरूपतो नित्यकर्मविरुध्दकर्मलक्षकतयो पुज्यते न तु तत्र कर्मदृष्टि क्वाप्युपयुज्यते।

बृहदारण्यके विविदिषाहेतुत्वं यज्ञादीनां दर्शयति।

ननु विद्या चविद्यां च यस्तदवेदोभय-ँ सह। कर्मणामप्यमृतत्व प्राप्तिहेतुत्वमवगम्यते। सत्यम्। अवगम्यत एव तदपेक्षितशुद्धि द्वारेण न च साक्षात्। तथाहि विद्यां चविद्यां च।

तपो विद्या च विप्रस्य नैः श्रेयसकरं परमित्यादिना ज्ञानकर्मणोर्नि:परमित्यादिना ज्ञानकर्मणोर्नि: श्रेयस:हेतुत्वमभिधाय कथमनयोस्तद्धेतुत्वमित्याकाङक्षयां तपसा कल्पसं हन्तिविद्ययाऽमृतमश्नुते अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते इति वाक्य शेषेण कर्मण: कल्मषक्षयहेतुत्वंविद्यया अमुतप्राप्तिहेतुत्वं प्रदर्शितम्। यत्र तु शुद्धयाद्यवान्तरकार्यानुपदेश -स्तत्रापि शाखान्तरोपसंहारन्यायेनोपसंहार: कर्तव्य:। ननु कुर्वन्नेवेह कर्मणि जिजीविषेच्छत-ँसमा इति यावज्जीवकर्मानुष्ठाननियमे सति कथं विद्याया मोक्ष साधनत्वम्। उच्यते। कर्मण्यधिकृतस्यायंनियमो नानधिकृतस्यानियोज्यस्य ब्रह्मवादिन:।

यदा पुन: फलनिरपेक्षमीश्वरार्थं कर्मानुतिष्ठन्ति तदा मोक्षसाधनज्ञानसाधनान्त: करण शुद्धि: साधन पारंपर्येण मोक्षसाधनं भवति।

तथाऽऽह भगवान्--

ब्रह्मण्याधाय कर्मणिसङत्यक्तवा करोति यः।

लिप्यते न स पापेन पद्मपत्रमिवाम्भसा।।[1]

कायेन मनसा बुद्धया केवलैरिन्द्रियैरपि।

योगिनः कर्म कुर्वन्तिसङ्ग त्यक्त्वाऽऽत्मशु;ये।।[2]

यत्करोषि यदश्नासि-

यज्जुहोषि यदासि यत्।

यत्तापस्यमि कौन्तेय-

तत्कुरुष्व मदर्पणम्।।[3]

शुभाशुभफलैरेवं -

मोक्ष्यसे कर्मबन्धनैः।

संन्यासयोगयुक्तात्मा-

विमुक्तो मामुपैश्यसीति।।[4]

तथा च मोक्षे क्रमं शुद्धयभावे मोक्षाभावं कर्मभिश्च तच्छुद्धिं दर्शयति श्रीविष्णु धर्मे --

अनूचानस्ततोयज्वाकर्मन्यासी ततः परम्।

---

1. कृ.यजु. श्वेताश्वनरोपनिषत्-पृ.4
2. श्वेता.
3. श्वेता.
4. श्रीविष्णु धर्मे

ततो ज्ञानित्वमभ्येतियोगी मुक्तिं क्रमाल्लभेत्।।[1]

अनेकजन्मसंसारचिते ापसमुच्चये।

नाक्षीणे जायते पुंसां गोविन्दाभिमुखी मतिः।।[2]

तथा च मोक्षे क्रमं शुद्धयभावे मोक्षाभावं कर्मभिश्च तच्छुद्धिं दर्शयति श्रीविष्णु धर्मे --

अनूचानस्ततो यज्वा–
कर्मन्यासी ततः परम्।
ततो ज्ञानित्वमभ्येति–
योगी मुक्तिं क्रमाल्लभेत्।।[3]
अनेकजन्मसंसारचिते–
पापसमुच्चये।
नाक्षीणे जायते पुंसां–
गोविन्दाभिमुखी मतिः।।[4]
जन्मान्तरसहस्रेषु–
तपोज्ञानसमाधिभिः।
नराणां क्षीणपापानां–
कृष्णे भक्तिः प्रजायते।।[5]

---

1. श्रीविष्णु धर्मे
2. श्रीविष्णु धर्मे
3. श्रीविष्णु धर्मे
4. श्रीविष्णु धर्मे, 5. श्रीविष्णु धर्मे

पापकर्माशियो हात्र यत्नं कार्य संसार भीरुणा।

सुवर्णादिमहादान पुण्यतीर्थावगाहनैः।।[1]

सारीरैश्च महाक्लेशैः शास्त्रोक्तस्तच्छमो भवेत्।।[2]

देवतास्तुति सच्छास्र श्रवणैः पुण्यदर्शनैः।

गुरूश्रूषणैश्चैव पापबन्धः प्रशाम्यति।।''

याज्ञवल्क्योऽपि शुद्धयपेक्षयां तत्साधनं च दर्शयति।

कर्तव्याऽऽशयशुद्धिस्त भिक्षुकेण विशेषतः।

ज्ञानोत्पत्तिनिमित्तवात्स्वतन्त्री करणाय च।।

मलिनो हि यथाऽऽदर्शो रूपालोकस्य न क्षमः।

तथाऽविषक्करण आत्मज्ञानस न क्षमः।।[3]

आचार्योपासनं वेदशास्त्रस्य विवेकिता।

सत्कर्मणामनुष्ठानं सङ्गः सद्भिगिरिः शुभाः।।

स्त्र्यालोकालम्भविगमः सर्वभूतात्मदर्शनम्।

त्यागः परिग्रहाणां च जीर्णकाषायधारणम्।।[4]

विषयेन्द्रियसंशोधस्तन्द्रालस्यविर्जनम्।

शरीरपरिसंख्यानं प्रवृत्तिष्वधवर्जनम्।।

---

1. श्रीविष्णु धर्मे
2. श्रीविष्णु धर्मे
3. श्रीविष्णु धर्मे
4. श्रीविष्णु धर्मे

नीरजस्तमसा सत्वशसुद्धिर्निस्पृहता शमः।

एतैरूपायैः संशुद्धसत्वयोग्यमृती भवेत्।।

यतो वेदाः पुराणानि विद्योपनिषदस्तथा।

श्लोकाः सूत्राणि भाष्याणि यच्चानद्वाङ्मयं क्वचित्।।[1]

वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः।

श्रद्धोपवासः स्वातन्त्र्यमात्मनो ज्ञानहेतवः।।[2]

**तथाचाऽऽथवर्णे विशुद्धयपेक्षमात्मज्ञानं दर्शयति।**

जन्मान्तरसहस्रेषु यदा क्षीणस्तु किल्विषा।

तदा पश्यन्ति योगेन संसाररेच्छेदन महत्।।[3]

यस्मिन्विशुद्धे विरजे च चित्ते य आत्मवत्पश्यन्ति यतयः क्षीणदोषाः तमेतं वेदानवचनेन विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेति।

तथाच विदुषः कर्मानधिकारं दर्शयति श्रुतिः।

नैतद्विद्वानृषिणा विधेयो न रुध्यते॑धिना शब्दचारः।।[4]

एतद्ध स्म वै तत्पूर्वे विद्वासोंऽग्निहोत्र न जुह्वांचिकिरे तं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च

---

1. याज्ञवल्क्य
2. याज्ञवल्क्य
3. कृ.य. श्वेतारेपनिषद्–पृ.6
4. कृ.य. श्वेतारेपनिषद्

लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरन्ति। एतद्ध स्म वै तद्विद्वांस आहुर्त्रऋषयः कावयाः किमर्था वयमध्येष्यामहे किमर्र्ाा वयं यक्ष्यामहे स ब्राह्मणः केन स्याधेन तेनेद्येन तेनेदृश एवेति।।

यथाऽऽह भगवान्--

यस्तवात्मरतिरेव स्यादात्मतृपश्च मानवः।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते।।[1]

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन्।
नचास्य सर्वभूतेषु कश्चिदर्थव्यापाश्रयः।।[2]

नमस्यामोदेवान्ननु हतविधेस्तेऽपि वशगा
विधिर्वन्धः सोऽपि प्रतिनियतकमैर्कफलदः।
फलं कर्मायत्तां किमकरगणैः किं च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति।।[3]

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन्।
नचास्य सर्वभूतेषु कश्चिदर्थव्यापाश्रयः।।[4]

---

1. कृ. य. श्वेताश्वरापनिषद्- पृ.-6/7
2. कृ. य. श्वेताश्वरापनिषद्- पृ.-6/7
3. नीतिशतकम्
4. नीतिशतकम्

नमस्यामोदेवान्ननु हतविधेस्तेऽपि वशगा
विधिर्वन्धः सोऽपि प्रतिनियतकमैर्कफलदः।
फलं कर्मायत्तां किमकरगणैः किं च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति।।[1]

ब्रह्मा येन कुलालवन्नियमितो ब्रह्मण्डभाण्डोदरे,
विष्णुर्येन दशावतारगहने क्षिप्तो महासंकटे।
रुद्रो येन कपालपणिपुटके भिक्षाटनं कारितः,
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे।।[2]

क्षान्तं न क्षमया गृहेचित्तसुखं त्यक्तं न संतोषतः
सौढा दुःसहशीतवाततपनाः क्लेशान्न तप्तं तपः।
ध्यातं वित्तमहर्निशं नियमतिप्राणैर्न शंभोः पदं,
तत्तकर्म कृतं यदेव मुनिभिस्तैस्तेः फलैर्वञ्चिताः।।[3]
नो चिन्तामण्यो न कल्पतरवो नाष्टौ महासिद्धय-
स्तावद्देहवशाः परोपकृतये नास्मभिरप्यर्जिताः।
नेदं मज्जति मानसं च चपलं ब्रह्ममृतारम्भोनिद्यौ
घिक्घिक्कर्म कृटीमिमां तदपि न त्युक्तं वयं शक्नुमः[3]।।

---

1. वैराग्यशतक-13
2. वैराग्यशतक
3- वैराग्य-शतक-क्षेपक-2 4.वैराग्यशतकम्